# Devaih Krita Narayanastutih

# देवैः कृता नारायणस्तुतिः

## Document Information

Text title : NarayanastutiH Devaih Krita

File name : nArAyaNastutiHdevaiHkRRitA.itx

Category : vishhnu, stuti, viShNu

Location : doc_vishhnu

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : vAyupurANa. ekaliNgamAhAtmyam . navamo.adhyAyaH - indravaradAnam . 9.18-29 ..

Latest update : October 14, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 19, 2025

*sanskritdocuments.org*

# देवैः कृता नारायणस्तुतिः

(एकलिङ्गमाहात्म्ये)

देवा ऊचुः -

मत्स्यः कूर्मो वामनस्त्वं नृसिंहो
रामो विष्णुः शूकरो भार्गवश्च ।
दत्तात्रेयो बुद्धरूपोऽथ भावी
कल्किरूपः पालयामास विश्वम् ॥ १८॥

भूमेर्भारं त्वदृते कः समर्थो
वोढुं दैत्यान् हन्तुमन्यो न चास्ति ।
मात्स्यं रूपं यो विधायार्णवाम्भ-
स्तूर्णं भित्त्वा सर्वविद्यामयत्वम् ॥ १९॥

नावं कृत्वा तत्र विश्वं निधाय
वेदान् यो वै ब्रह्मणे तान् ददौ हि ।
कूर्मो भूत्वा स्वस्य पृष्ठे निधाय
क्षोणीं न्यस्य तत्र चैनं शिरस्सु ॥ २०॥

विश्वं दध्रे विश्वकर्ता य एकः
कस्ते पारं ज्ञातुमन्यः समर्थः ।
कृत्वा रूपं शूकरं यो महात्मा
मग्नां पृथ्वीं हेलयोच्चैश्चचार ॥ २१॥

सैंही मूर्तिः कशिपु यो हिरण्य-
पूर्वं दद्रे पाणिजैर्वक्षसीह ।
अजो जातो वामनो वामनः सन्
ह्रस्वाद्ध्रस्वं यो विधायाच्छरूपम् ॥ २२॥

धाताऽदित्यां पुत्रतां प्राप्यमानः

पाताले वैरोचनं चच्छलेन ।
रामेण त्रिःसप्तकृत्वो रुषा तु
हन्तुं क्षत्रं हैहयं वै विजित्य ॥ २३॥

ह्रदं कृत्वाऽसृग्भिराशु स्वकीयान्
यो वै पितॄनतर्पयत् रामकूपे ।
दशग्रीवं यो निहत्याजिभूमौ
रामौ भूत्वा लक्ष्मणेनानुयुक्तः ॥ २४॥

बध्वा सेतुं वानरैः सागरेऽपि
पौलस्त्यं यो वै मैथिलीमानिनाय ।
देवक्यां यः पुत्रतामेति भूयः
कंसं जित्वा भूमिभारस्य हर्ता ॥ २५॥

हत्वा चैद्यान्नारकादींश्च सर्वान्
इन्द्रे राज्यं कल्पयामास नाके ।
योगं यो(ऽ)गा(द्)यो बुधस्यैव रूपो
निर्व्यापारो विश्वकृद्विश्वरूपः ॥ २६॥

ध्यानं चक्रे योगमालां गृहीत्वा
योगिध्येयो नास्ति पूज्योऽस्य कश्चित् ।
स्मर्तुं वेदानत्रिपुत्रो भवांश्च
दत्तात्रेयो विश्वयोनेः सकाशात् ॥ २७॥

हृतान् मत्वा मायया विप्रपुत्रान्
भूयोऽदाद्वै ब्राह्मणेभ्यो महात्मा ।
यो वेदानां बहुमार्गं व्यधत्त
पाराशर्यो विश्वमुख्यस्य हेतोः ॥ २८॥

विस्तारत्वं यश्चकाराथ वेदे
संसाराब्धौ पातितं विश्वमीक्ष्य ।
एवं विश्वं यो बिभर्ति स्वरूपै-
रासङ्ख्येयैस्तस्य सङ्ख्यां न विद्मः ॥ २९॥

इति एकलिङ्गमाहात्म्ये देवैः कृता नारायणस्तुतिः सम्पूर्णा ।

- ॥ एकलिङ्गमाहात्म्यम् । नवमोऽध्यायः - इन्द्रवरदानम् । ९.१८-२९॥

- .. ekali NgamAhAtmyam . navamo.adhyAyaH - indravaradAnam . 9.18-29 ..

Notes:

Devatās देवताः eulogize the Daśāvatāra-s दशावताराः of Nārāyaṇa नारायण, as they pray to Him to grant a way towards respite from the atrocities caused by Vṛtrāsura वृत्रासुर.

EkaliṅgaMāhātmyam एकलिङ्गमाहात्म्यम्, that constitutes a SthalaPurāṇa स्थलपुराण and SthalaMāhātmyam स्थलमाहात्म्यम्, has been composed in two styles - Paurāṇika पौराणिक and Kāvyamaya काव्यमय. It includes the descriptions about the manifestation of the Ekaliṅga Śiva Kṣetra एकलिङ्ग शिव क्षेत्र in relation to the story of the duo - Baṣpa Rājā बाष्प राजा - Hārīta Muni हारीत मुनि, and the lineage of kings of Citrakūṭa चित्रकूट (now k.a. Cittauṛagaṛha चित्तौड़गढ़ ) and Medapāṭa मेदपाट (now k.a. Mevāṛa मेवाड़ ) including Mahārāṇā Kumbhā महाराणा कुम्भा.

Baṣpa Rājā बाष्प राजा is now popularly known as Bappā Rāvala बप्पा रावल.

The VāyuPurāṇam वायुपुराणम् has been attributed to be the source composition of EkaliṅgaMāhātmyam एकलिङ्गमाहात्म्यम् as the main narrator of the same is Vāyu वायु.

EkaliṅgaMāhātmyam - Paurāṇika एकलिङ्गमाहात्म्यम् - पौराणिक is composed in 32 chapters that, with a brief summary of each chapter; and the EkaliṅgaMāhātmyam - Kāvyamayam एकलिङ्गमाहात्म्यम् - काव्यमयम् can be accessed from the respective links given below.

EkaliṅgaMāhātmyam - Kāvyamayam एकलिङ्गमाहात्म्यम् - काव्यमयम् includes description of the lineage of Baṣpa Rājā बाष्प राजा, Stuti स्तुति of the erudite Mahārāṇā Kumbhā महाराणा कुम्भा i.e. Kumbhakaraṇa कुम्भकरण, and the Pañcāyatana Stuti पञ्चायतन स्तुति. The latter comprises of Stuti-s of Ganeśa गणेश, Sūrya सूर्य, Nārāyaṇa नारायण, Śiva शिव, Caṇḍikā चण्डिका and Ekaliṅga Śiva एकलिङ्ग शिव.
It is noteworthy that the Pañcāyatana Stuti पञ्चायतन स्तुति has some names associated with Kumbhā कुम्भा such that he is remembered with each of the Deity worshipped with this stuti. Towards conclusion, there is EkaliṅgaNamaskāra एकलिङ्गनमस्कार.

Encoded and proofread by Ruma Dewan

*Devaih Krita Narayanastutih*

pdf was typeset on October 19, 2025

Please send corrections to *sanskrit@cheerful.com*